**पत्रिका– ३**

**संस्कृतवाक्यान्यङ्ग्लीभाषया विद्यार्थिनो विपरिणमयेयुः ।**

१) भगवानन्तर्धानमकरोत् ।

२) धुर्यौ चोदय चक्रं स्कन्धेन प्रचाल ।

३) मम साहाय्यं वाञ्छसि चेदुत्तिष्ठ ।

४) पूर्वस्यां दिशि सूर्य उदयते ।

५) भगवतः साहाय्येन चक्रं पङ्कान्निरगच्छत् ।

६) तप्तं नवनीतं घृतं सम्पद्यते ।

७) किं निमित्तं विलपसि ।

८) काष्ठच्छित् वने स्थितान् कतिचिद्वृक्षानच्छिनत् ।

९) अयमश्वो रथे बध्यते ।

१०) राजानश्चतुरः तुरगान् रथे योजयन्ति ।

११) अश्वाः सुशिक्षिताः सञ्चारायोपयुज्यन्ते ।

१२) शृगालोऽयं पानीयं पातुं वापीं गतो जले ममज्ज ।

१३) अजो वाप्यां मज्जनोन्मज्जने कुर्वन् विपेदे ।

१४) सारङ्गोऽश्वं केदारान्निरवासयत् ।

१५) तुरगो मनुजं निजगाद पर्याणं खलीनं चापनीय मां गमनायानुमन्यस्वेति ।

१६) सा स्त्री कूपाज्जलमुद्धरति ।

१७) कूपस्य पार्श्वयोर्द्वौ स्तम्भौ निखातौ । तस्य मध्ये दारुचक्रं पिनद्धम् ।

१८) केचिद्वानरा वृक्षाद्वृक्षं विटपाद्विटपञ्च प्लवन्ते ।

१९) वानरा गृहान् कर्तुं न प्रभवन्ति ।

२०) मयूरः पिच्छानि विस्तृत्य नृत्यति ।

२१) कुक्कुटः केदारे भक्ष्यमन्विष्यति ।

२२) समये तत्रैवं निर्णीतम् ।

२३) न कोऽपि समयमुल्लङ्घते ।

२४) तुरङ्गो द्रुतं पलायितः ।

२५) नैकोऽपि मामनुशोचति ।

२६) गजो जलमादाय तन्मुखे निषिञ्चति ।

२७) एकदा दश मूढा देशाटनाय प्रस्थिताः ।

२८) सर्वे नद्यास्तीरमनुप्राप्ताः ।

२९) नद्यां निमग्नमेकं गवेषयत ।

३०) कुक्कुटः पक्षौ विस्तृत्य वदनं विधूय तारं रटन् रत्नं समगर्हयत् ।

३१) रे रत्न शिरसा धृत्वा लोकस्त्वामभिनन्दतु । किन्तु धान्यकणेन त्वं नैव सादृश्यमर्हसि ॥

३२) याचनेन यल्लभ्यते तेनोदरं पूरयति ।

३३) विद्यया कथं जिविका निर्वर्त्यते ।

३४) विद्यया बुद्धिर्विकसति ।

३५) अहं श्वः प्रभृति पाठलयं गत्वा विद्यां अभ्यस्यामि ।

३६) गच्छता कालेन स महांश्चोरः संवृत्तः ।

३७) चोरः सर्वान् व्यापाद्य रत्नान्यादाय प्रतस्थे ।

३८) दण्डाधिपश्चोरस्य वधदण्डं व्यधात् ।

३९) रमावल्लभो विश्वस्योदयमातनोति तदनु त्राणं विधत्ते ।

४०) भगवान् श्रमापहृतये सुस्वापं प्रापयति ।

४१) वृश्चिकश्चोरं दंशति ।

४२) कोऽप्यागत्याऽवां वृक्षादवतारयेत् ।

४३) उपाध्यायो मां हस्तं प्रसारयेत्यवदत् ।

४४) कालिदासः प्रतिभया सर्वानन्यान् कवीनत्यशेत ।

४५) जनको महता विभवेन सीतारामयोर्विवाहोत्स्वं निरवर्तयत् ।

४६) राजकुमारस्तं मुनिमुपसृत्य निष्कान् तस्मै समर्पयति ।

४७) एहि बालक ।

४८) सिंहं राज्येऽभिषिञ्चामः ।

४९) पक्षिणः समूह उलूकमेवं अभिदधाति ।

५०) बाला गानमारभते ।